# श्रीस्तवावल्यां
# चैतन्याष्टकम्

# Caitanyāṣṭakam

Version 1.0

रघुनाथदासगोस्वामिरचितम्

Raghunāthadāsa Gosvāmin

Edited and typeset
by
Neal Delmonico
for the
Gauḍīya Grantha Mandira

May 19, 2006

हरिर्दृष्ट्वा गोष्ठे मुकुरगतमात्मानमतुलं
स्वमाधुर्यं राधाप्रियतरसखीवाप्तुमभितः।
अहो गौडे जातः प्रभुरपरगौरैकतनुभाक्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ १ ॥

पुरीदेवस्यान्तःप्रणयमधुना स्नानमधुरो
मुहुर्गोविन्दोद्यद्विशदपरिचर्यार्चितपदः।
स्वरूपस्य प्राणार्बुदकमलनीराजितमुखः
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ २ ॥

दधानः कौपीनं तदुपरि बहिर्वस्त्रमरुणं
प्रकाण्डो हेमाद्रिद्युतिभिरभितः सेविततनुः।
मुदा गायन्नुच्चैर्निजमधुरनामावलिमसौ
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ ३ ॥

अनावेद्यां पूर्वैरपि मुनिगणैर्भक्तिनिपुणैः
श्रुतेर्गूढां प्रेमोज्ज्वलरसफलां भक्तिलतिकां।
कृपालुस्तां गौडे प्रभुरतिकृपाभिः प्रकटयन्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ ४ ॥

निजत्वे गौडीयान् जगति परिगृह्य प्रभुरिमान्
हरेकृष्णेत्येवं गणनविधिना कीर्तयत भोः ।
इति प्रायां शिक्षां जनक इव तेभ्यः परिदिशन्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ ५ ॥

पुरः पश्यन्नीलाचलपतिमुरुप्रेमनिवहैः
क्षरन्नेत्राम्भोभिः स्नपितः निजदीर्घोज्ज्वलतनुः।
सदा तिष्ठन् देशे प्रणयिगरुडस्तम्भचरमे
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ ६ ॥

मुदा दन्तैर्दष्ट्वा द्युतिविजितबन्धूकमधरं
करं कृत्वा वामं कटिनिहितमन्यं परिलसन्।

समुत्थाप्य प्रेम्णागणितपुलको नृत्यकुतुकी
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ ७ ॥

सरित्तीरारामे विरहविधुरो गोकुलविधोर्
नदीमन्यां कुर्वन्नयनजलधाराविततिभिः।
मुहुर्मूर्च्छां गच्छन्मृतकमिव विश्वं विरचयन्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः॥ ८ ॥

शचीसूनोरस्याष्टकमिदमभीष्टं विरचयत्
सदा दैन्योद्रेकादतिविशदबुद्धिः पठति यः।
प्रकामं चैतन्यः प्रभुरतिकृपावेशविवशः
पृथुप्रेमाम्भोदौ प्रथितरसदे मज्जयति तम्॥ ९ ॥

इति श्रीचैतन्याष्टकम्